नाशिनीम्। अहन्यहनि कर्त्तव्या या भिषग्भिरतन्द्रितैः। तपसां तेजसां चैव यशसां वपुषां तथा। निधानं योऽव्ययो देवः स ते स्कन्दः प्रसीदतु। ग्रह सेनापतिर्द्देवो देवसेनापतिर्विभुः। देवसेनारिपुहरः पातु त्वां भगवान् गुहः। देव देवस्य महतः पावकस्य च यः सुतः। गङ्गोमाकृत्तिकानाञ्च स ते शर्म्म प्रयच्छतु। रक्तमाल्याम्बरः श्रीमान् रक्तचन्दनभूषितः। रक्तदिव्यवपुर्द्देवः पातु त्वां क्रौञ्चसूदनः” १।

“अथातः स्कन्दापस्मारप्रतिषेधं व्याख्यास्यामः। विल्वः शिरीषो गोलोमी सुरसादिश्च यो गणः। परिषेके प्रयोक्तव्यः स्कन्दापस्मारशान्तये। सर्व्वगन्धविपक्वन्तु तैलमभ्यञ्जने हितम्। क्षीरवृक्षकषाये च काकोल्यादौ गणे तथा। विपक्तव्यं घृते वापि पानीयं पयसान्वितम्। उत्सादनं वचाहिङ्गुयुक्तं स्कन्दग्रहे हितम्। गृध्रोलूकपुरीषाणि केशा हस्तिनखा घृतम्। वृषभस्य च रोमाणि योज्यान्युद्धूपनेऽपि च। अनन्तां कुक्कुटीं विम्बीं मर्क्कटीञ्चापि धारयेत्। पक्वापक्वानि मांसानि प्रसन्नं रुधिरं पयः। घृतोदनो निवेद्यश्च स्कन्दापस्मारिणोऽवटे। चतुःपथे च कर्त्तव्यं स्नानमस्य यतात्मना। स्कन्दापस्मारसंज्ञोयः स्कन्दस्य दयितः सखा। विशाखसंज्ञश्च शिशोः शिवोऽस्तु विकृताननः” २।

“अथातः शकुनीप्रतिषेधं व्याख्यास्यामः। शकुन्यभिपरीतस्य कार्य्यो वैद्येन जानता। वेतसाम्रकपित्थानां निःक्वाथः परिषेचने। कषायमधुरैस्तैलं कार्य्यमभ्यञ्जने शिशोः। मधुकोशीरह्रीवेरशारिवोत्पलपद्मकैः। रोध्रप्रियङ्गुमञ्जिष्ठागैरिकैः प्रदिहेच्छिशुम्। व्रणेषूक्तानि चूर्णानि पथ्यानि विविधानि च। स्कन्दग्रहे धूपनानि तानीहापि प्रयोजयेत्। शतावरीमृगैर्वारुनागदन्तीनिदिग्धिकाः। लक्ष्मणां सहदेवीञ्च वृहतीञ्चापि धारयेत्। तिलतण्डुलकं माल्यं हरितालं मनःशिला। बलिरेष करञ्जेषु निवेद्यो नियतात्मना। निकुञ्जे च प्रयोक्तव्यं स्नानमस्य यथाविधि। स्कन्दग्रहोपशमनं घृतं तच्चेह पूजितम्। कुर्य्याच्च विविधां पूजां शकुन्याः कुसुमैः शुभैः। अन्तरिक्षचरा देवी सर्व्वालङ्कारभूषिता। अयोमुखी तीक्ष्णतुण्डा शकुनी ते प्रसीदतु। दुर्द्दर्शना महाकाया पिङ्गाक्षी भैरवस्वना। लम्बोदरी शङ्कुकर्णी शकुनी ते प्रसीदतु” ३।

“अथातो रेवतीप्रतिषेधं व्याख्यास्यामः। अश्वगन्धाजशृङ्गी च शारिवा सपुनर्न्नवा। सहे विदारी च तथा कषायाः सेचने हिताः। तैलमभ्यञ्जने कार्य्यं कुष्ठे सर्ज्जरसेऽपि वा। धवाश्वकर्णककुभधातकीतिन्दुकीषु च। काकोल्यादिगणे चैव पानीयं सर्प्पिरिष्यते। कुलत्थाः शङ्खचूर्णञ्च प्रदेहाः सर्व्वगन्धिकाः। गृध्रोलूकपूरीषाणि यवा यवफली घृतम्। सन्ध्ययोरुभयोः कार्य्यमेतदुद्धूपनं शिशोः। वरुणारिष्टकमयं रुचकं सैन्दुकं तथा। सततं धारयेच्चापि कृतं वा पौत्रजीविकम्। शुक्लाः सुमनसो लाजाः पयः शाल्योदनं तथा। बलिर्न्निवेद्यो गोतीर्थे रेवत्यै प्रयतात्मना। सङ्गमे च भिषक्स्नानं कुर्य्याद्धात्रीकुमारयोः। नानावस्त्रधरा देवी चित्रमाल्यानुलेपना। चलत्कुण्डलिनी श्यामा रेवती ते प्रसीदतु। लम्बा कराला विनता तथैव बहुपुत्रिका। रेवती सततं माता सा ते देवी प्रसीदतु” ४।

“अथातः पूतनाप्रतिषेधं व्याख्यास्यामः। कपोतवङ्काऽरलुको वरुणः पारिभद्रकः। आस्फोता चैव योज्याः स्युर्व्वालानां परिषेचने। वचा वयस्था गोलोमी हरितालं मनःशिला। कुष्ठं सर्ज्जरसश्चैव तैलार्थं वर्ग इष्यते। हितं घृतं तुगाक्षीर्य्या सिद्धं मधुरकेषु च। कुष्ठतालीशखदिरं चन्दनस्यन्दने तथा। देवदारुवचाहिङ्गुकुष्ठं गिरिकदम्बकः। एलाहरेणवश्चापि योज्या उद्धूपने सदा। गन्धनाकुलिकुम्भीकामज्जानो वदरस्य। कर्कटास्थि घृतञ्चैव धूपनं सर्षपैः सह। काकादनीं चित्रफलां विम्बीं गुञ्जाञ्च धारयेत्। मत्स्यौदनञ्च कुर्व्वीत कृशरं पललं तथा। शरावसम्पुटे कृत्वा बलिं शून्यगृहे हरेत्। उच्छिष्टेनाभिषेकेण शिरसि स्नानमिष्यते। पूज्या च पूतना देवी बलिभिः सोपहारकैः। मलिनाम्बरसंवीता मलिना रूक्षमूर्द्धजा। शून्यागाराश्रिता देवी दारकं पातु पूतना। दुर्द्दर्शना सुदुर्गन्धा कराला मेघकालिका। भिन्नागाराश्रया देवी दारकं पातु पूतना” ५।

“अथातोऽन्धपूतनाप्रतिषेधं व्याख्यास्यामः। तिक्तकद्रुमपत्राणां कार्य्यः क्वाथोऽवसेचने। सुरासौवीरकं कुष्ठं हरितालं मनःशिला। तथा सर्ज्जरसश्चैव तैलार्थमुपदिश्यते। पिप्पलः पिप्पलीमूलं वर्गो मधुरको मधु। शालपर्णी वृहत्यौ च घृतार्थमुपदिश्यते। सर्व्वगन्धैः प्रदेहश्च गात्रेष्वक्ष्णोश्च शीतलैः। पूरीषं कौक्कुटं केशांश्चर्म्म सर्पत्वचन्तथा। जीर्णाञ्च भिक्षुसङ्घाटीं धूपनायोपकल्पयेत्। कुक्कुटीं मर्कटीं शिम्बीमनन्ताञ्चापि धारयेत्। मांसमामं तथा पक्वं शोणितञ्च चतुःपथे। निवेद्यमन्तश्च गृहे